# A-III/1/22ANYS3CCTC1/23

## तृतीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-24)

## न्यायः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. विभक्तिः कतिविधा?
2. संख्यावाचकानामेकवचनद्विवचनबहुवचनानां कुत्र शक्तिः?
3. आख्यातद्विवचनबहुवचनयोः संख्याबोधकत्वं कुतः आवश्यकत्?
4. कर्मत्वं किंरूपं प्राचीनमते?
5. दुहेरर्थः कः?
6. अजां ग्रामं नयतीत्यत्र धात्वर्थः कः?
7. शिष्यं शास्त्रं ज्ञापयति इत्यादौ कर्तुः कर्मसंज्ञा केन सूत्रेण विधीयते?
8. दृशिसमभिव्याहृतद्वितीयायाः कोऽर्थः?
9. अनुमित्यर्थकधातुयोगे विषयतामात्रस्य द्वितीयार्थित्वे काऽनुपपत्तिः?
10. 'सन्' प्रत्ययविधायकं सूत्रं लिखत।
11. कारकविभक्तितृतीयायाः कोऽर्थः?
12. काष्ठेन पचतीत्यत्र कर्तुरपि करणतापत्तिः कथं वारणीया?
13. धूमेनानुमिनोमि इत्यत्र हेतुतृतीयार्थः कः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्रथमाविभक्त्यर्थं निरूप्य एकवचनादीनां शक्तिः कुत्रेति विचारयत।
15. 'गां दोग्धि पयः' इत्यत्र वाक्यार्थं वर्णयत।
16. 'अजां ग्रामं नयति', 'अजा ग्रामं नीयते' इति प्रयोगद्वये अन्वयबोधं निरूपयत।

17. पुष्पं जिघ्रति इति वाक्यस्यार्थं प्रतिपादयत।

18. अनुमित्यर्थकधातुयोगे द्वितीयार्थं वर्णयत।

19. हेतुतृतीयां सोदाहरणं निरूप्य हेतुत्वस्वरूपं निर्णयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. प्रथमार्थसंख्यायाः प्रकृत्यर्थे केन सम्बन्धेन अत्यः इति विचार्य निर्णयत।

21. प्राचीननवीनमतभेदेन द्वितीयार्थकर्मत्वं विवेचयत।

22. कारकविभक्तितृतीयाः कुत्र शक्तिरिति व्यवस्थापयत।

# A-III/2/22ANYS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-25)

## न्यायः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. सम्प्रदानचतुर्थीविधायकं सूत्रं किम् ?
2. सम्प्रदानत्वं नाम किम् ?
3. 'रजकस्य वस्त्रं ददाति' इत्यत्र ददातेरर्थः कः ?
4. 'विप्रायशतं धारयतीत्यत्र केन सूत्रेण सम्प्रदानता ?
5. 'उपाध्यायादधीते' इत्यत्र पञ्चम्यर्थं लिखत।
6. 'भुवः प्रभवः' इति सूत्रे प्रभवो नाम कः ?
7. 'शुक्लीकरोति' इत्यादौ च्विप्रत्ययविधायकं सूत्रं किम् ?
8. शैषिकषष्ठीविधायकसूत्रस्यार्थं लिखत।
9. समवेतत्वादेः षष्ठ्यर्थत्वे 'हस्तस्य चैत्रः' 'शाखायाः वृक्षः' इत्यादिकं कथं न प्रयुज्यते ?
10. 'भुवि गच्छती'त्यत्र' सप्तम्याः कोऽर्थः ?
11. 'वीणायां शब्दः' इत्यत्र सप्तम्यर्थः कः ?
12. 'चर्मणि द्वीपिनं हन्ति' इत्यत्र केन सूत्रेण सप्तमी ?
13. 'यूपाय दारु' इत्यत्र चतुर्थ्यर्थः कः ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. 'विप्राय शतं धारयति' इत्यत्र धार्यर्थं निर्णयत।
15. 'शुक्लीभवति' इत्यत्र वाक्यार्थं वर्णयत।

16. 'व्याघ्रात् बिभेति' इत्यत्र पञ्चमीनिर्वाहप्रकारं दर्शयत।

17. 'अस्मादयं दीर्घः' इत्यादौ केन सूत्रेण पञ्चमी इति विचार्य निर्णयत।

18. शैषिकषष्ठीं सोदाहरणं प्रतिपादयत।

19. 'यस्य च भावेन भावलक्षणम्' इति सूत्रविहितसप्तमीस्थलेषु वाक्यार्थं निरूपयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. कर्मत्वसम्प्रदानत्वयोः भेदमुपवर्ण्य 'ब्राह्मणाय गां ददाति' इत्यत्र बोधप्रकारं वर्णयत।

21. अपादानत्वं निरुच्य 'वृक्षात् पर्णं पतति' इत्यत्र वाक्यार्थं निरूपयत।

22. निर्धारणषष्ठीस्थले 'नराणां क्षत्रियः शूरः नरेषु वा' इत्यत्र विवक्षितार्थलाभप्रकारं प्रदर्शयत।

# A-III/3/22ANYS3CCTC3/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-26)

## न्यायः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. शाब्दबोधो नाम कः?
2. शाब्दबोधे भासमानः पदार्थद्वयसंसर्गः कतिविधः?
3. कीदृशेन पदेन उपस्थापितस्यार्थस्य अभेदः भासते?
4. अभेदो नाम कः?
5. मीमांसकमते शाब्दबोधे मुख्यविशेष्यः कः?
6. भावनामुख्यविशेष्यकबोधे किं जैमिनीयसूत्रं प्रमाणम्?
7. मीमांसकमते पदार्थानामन्वये सर्वण्साधारणी व्युत्पत्तिः का स्वीक्रियते?
8. चैत्रेण सुप्यते इत्यत्र मीमांसकमते कीदृशो बोधो जायते?
9. वैयाकरणमते धात्वर्थस्य विशेष्यत्वं कया स्मृत्या सिद्ध्यति?
10. निरुक्तकारेण उक्तं नाम लक्षणं किम्?
11. नैयायिकमते आख्यातार्थः कः?
12. नैयायिकमते प्रथमान्तार्थः कुत्र स्थले मुख्यविशेष्यतया भासते?
13. नैयायिकमते द्वितीयार्थः कः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. विशेष्यविशेषणपदयोः समानवचनकत्वनियमः कुत्र इति निरूपयत।
15. प्रथमान्तपदस्यापि क्रियापदसाकाङ्क्षत्वमस्तीति मीमांसकमतेन प्रतिपादयत।

16. मीमांसकमते कर्तृकर्मभावाख्यातस्थलेषु निष्कृष्टशाब्दबोधं वर्णयत।

17. वैयाकरणमतेन भावप्रधानमाख्यातमिति निरुक्तस्य धात्वर्थप्राधान्यपरत्वं व्यवस्थापयत।

18. प्राचीनवैयाकरणसम्मतां बोधसरणिं कर्तृकर्मभावाख्यातस्थलेषु दर्शयत।

19. नैयायिकमते कीदृशः चैत्र इति प्रश्नस्य चैत्रः पचतीति उत्तरप्रसङ्गं वारयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. मीमांसकाभिप्रेतं भावनामुख्यविशेष्यकशाब्दबोधं निरूपयत।

21. प्रथमान्तार्थस्य मुख्यविशेष्यत्वे वैयाकरणोक्तान् दोषान् परिगणयत।

22. नैयायिकमते 'पश्य मृगो धावति' इत्यत्र एकवाक्यत्वं प्रतिपादयत।

# A-III/4/22ANYS3CCTC4/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-27)

## न्यायः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. विषयतायाः ज्ञानरूपत्वे को दोषः?
2. प्रतियोगितायाः प्रतियोगिस्वरूपत्वे को दोषः?
3. अधिकरणत्वं कुतो नाधिकरणस्वरूपम्?
4. द्विविधशक्तेरुदाहरणं दर्शयत।
5. अपूर्वस्य यागादिव्यापारत्वं कुतः स्वीक्रियते?
6. प्रोक्षणादिजन्योऽतिशयः सिद्धान्ते किंनिष्ठः?
7. व्रीह्यादीनां संस्कार्यकर्मता कथम्?
8. सादृश्यं कः पदार्थः?
9. किं नाम वैधर्म्यम्?
10. भाट्टमते ज्ञातता नाम का?
11. सिद्धान्ते ज्ञानकर्मत्वं किंरूपम्?
12. गौणी किं रूपा?
13. व्यञ्जनायाः द्वैविध्यं दर्शयत।

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. विषयतायाः अतिरिक्तत्वं सयुक्तिकं साधयत।
15. सहजशक्तेरतिरिक्तत्वं खण्डयत।

16. आधेयशक्तिपक्षमुपपादयत।

17. सादृश्यस्य पदार्थान्तरत्ववादिनां मीमांसकानामाशयं प्रतिपादयत।

18. भाट्टमतरीत्या ज्ञाततां साधयत।

19. लक्षणायाः स्वरूपं निरूप्य गौण्याः तत्रान्तर्भावं दर्शयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. आधेयत्वादीनामतिरिक्तपदार्थत्वं स्थापयत।

21. 'संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः।

स्वगुणाः परमाणूनां विशेषाः पाकजादयः॥

इति कारिकायाः भावं विशदयत।

22. व्यञ्जनायाः लक्षणायामन्तर्भावं प्रतिपादयत।